## ७. ज्ञानविज्ञानयोगः

श्रीभगवानुवाच

मय्य् आसक्तमनाः पार्थ  योगं युञ्जन् मदाश्रयः ।
असंशयं समग्रं मां   यथा ज्ञास्यसि तच्छृणु  ॥७.१॥
ज्ञानं तेऽहं सविज्ञानम्  इदं वक्ष्याम्य् अशेषतः ।
यज् ज्ञात्वा नेह भूयोऽन्यज्  ज्ञातव्यम् अवशिष्यते ॥७.२॥
मनुष्याणां सहस्रेषु  कश्चिद् यतति सिद्धये ।
यतताम् अपि सिद्धानां  कश्चिन् मां वेत्ति तत्त्वतः ॥७.३॥
भूमिर् आपोऽनलो वायुः  खं मनो बुद्धिर् एव च ।
अहंकार इतीयं मे  भिन्ना प्रकृतिर् अष्टधा ॥७.४॥
अपरेयम् इतस् त्व् अन्यां  प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो  ययेदं धार्यते जगत् ॥७.५॥
एतद्योनीनि भूतानि  सर्वाणीत्य् उपधारय ।
अहं कृत्स्नस्य जगतः  प्रभवः प्रलयस् तथा ॥७.६॥
मत्तः परतरं नान्यत्  किंचिद् अस्ति धनंजय ।
मयि सर्वम् इदं प्रोतं  सूत्रे मणिगणा इव ॥७.७॥
रसोऽहम् अप्सु कौन्तेय   प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु   शब्दः खे पौरुषं नृषु ॥७.८॥
पुण्यो गन्धः पृथिव्यां च  तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु  तपश् चास्मि तपस्विषु ॥७.९॥
बीजं मां सर्वभूतानां  विद्धि पार्थ सनातनम् ।
बुद्धिर् बुद्धिमताम् अस्मि  तेजस् तेजस्विनाम् अहम् ॥७.१०॥
बलं बलवतां चाहं  कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु  कामोऽस्मि भरतर्षभ ॥७.११॥
ये चैव सात्त्विका भावा  राजसास् तामसाश्च ये ।
मत्त एवेति तान् विद्धि  न त्व् अहं तेषु ते मयि ॥७.१२॥
त्रिभिर् गुणमयैर् भावैर्  एभिः सर्वम् इदं जगत् ।
मोहितं नाभिजानाति  माम् एभ्यः परम् अव्ययम् ॥७.१३॥
दैवी ह्य् एषा गुणमयी  मम माया दुरत्यया ।
माम् एव ये प्रपद्यन्ते  मायाम् एतां तरन्ति ते ॥७.१४॥
न मां दुष्कृतिनो मूढाः  प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना  आसुरं भावम् आश्रिताः ॥७.१५॥
चतुर्विधा भजन्ते मां  जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुर् अर्थार्थी  ज्ञानी च भरतर्षभ ॥७.१६॥
तेषां ज्ञानी नित्ययुक्त  एकभक्तिर् विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थम्  अहं स च मम प्रियः ॥७.१७॥
उदाराः सर्व एवैते  ज्ञानी त्व् आत्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा  माम् एवानुत्तमां गतिम् ॥७.१८॥
बहूनां जन्मनाम् अन्ते  ज्ञानवान् मां प्रपद्यते ।
वासुदेवः सर्वम् इति  स महात्मा सुदुर्लभः ॥७.१९॥
कामैस् तैस्तैर् हृतज्ञानाः  प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियमम् आस्थाय  प्रकृत्या नियताः स्वया ॥७.२०॥
यो यो यां यां तनुं भक्तः  श्रद्धयार्चितुम् इच्छति ।
तस्य तस्याचलां श्रद्धां  ताम् एव विदधाम्य् अहम् ॥७.२१॥
स तया श्रद्धया युक्तस्  तस्याराधनम् ईहते ।
लभते च ततः कामान्  मयैव विहितान् हि तान् ॥७.२२॥
अन्तवत् तु फलं तेषां  तद् भवत्य् अल्पमेधसाम् ।
देवान् देवयजो यान्ति  मद्भक्ता यान्ति माम् अपि ॥७.२३॥
अव्यक्तं व्यक्तिम् आपन्नं  मन्यन्ते माम् अबुद्धयः ।
परं भावम् अजानन्तो  ममाव्ययम् अनुत्तमम् ॥७.२४॥
नाहं प्रकाशः सर्वस्य  योगमायासमावृतः ।
मूढोऽयं नाभिजानाति  लोको माम् अजम् अव्ययम् ॥७.२५॥
वेदाहं समतीतानि  वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि  मां तु वेद न कश्चन ॥७.२६॥
इच्छाद्वेषसमुत्थेन  द्वन्द्वमोहेन भारत ।
सर्वभूतानि संमोहं  सर्गे यान्ति परंतप ॥७.२७॥
येषां त्व् अन्तगतं पापं  जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता  भजन्ते मां दृढव्रताः ॥७.२८॥
जरामरणमोक्षाय  माम् आश्रित्य यतन्ति ये ।
ते ब्रह्म तद् विदुः कृत्स्नम्  अध्यात्मं कर्म चाखिलम् ॥७.२९॥
साधिभूताधिदैवं मां  साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां  ते विदुर् युक्तचेतसः ॥७.३०॥

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः ॥